श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सरलकवि श्रीराघवाचार्य कृतं

# ॥ श्री महालक्ष्मी मङ्गळम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री महालक्ष्मी मङ्गळम् ॥

वेदान्तवेद्यविभवे विष्णुवक्षोविहारिणि।
अरविन्दाक्षदयिते लक्ष्म्यस्तु तव मङ्गळम्॥ १॥

सर्वमङ्गळमाङ्गळ्ये सर्वमङ्गळदेवते।
सर्वमङ्गळया स्तुत्ये लक्ष्म्यस्तु तव मङ्गळम्॥ २॥

पद्मसद्मे पद्महस्ते पद्मलोचनभामिनि।
पद्मभूपूजिते नित्यं लक्ष्म्यस्तु तव मङ्गळम्॥ ३॥

इन्द्राणी मुख गीर्वाणी गणसेवा प्रहर्षिणि।
सर्वेषां जगतामम्ब लक्ष्म्यस्तु तव मङ्गळम्॥ ४॥

त्वदिङ्गितपराधीनो हरिस्सर्वेश्वरोऽपि सन्।
कुरुते निखिलं कर्म लक्ष्म्यस्तु तव मङ्गळम्॥ ५॥

इन्द्राय त्यक्तशापाय त्रैलोक्यैश्वर्यदायिनि।
अष्टभिर्मूर्तिभिर्जुष्टे लक्ष्म्यस्तु तव मङ्गळम्॥ ६॥

सुपर्वभिस्सदाराध्ये शोभावति शुचिस्मिते।
सर्वकामप्रदे देवि लक्ष्म्यस्तु तव मङ्गळम्॥ ७॥

शुभानि निजनामानि सदावर्तयतां सताम्।
मुदा श्रेयोविधायिन्या लक्ष्म्यस्तु तव मङ्गळम्॥ ८॥

सतामात्महविस्त्यागक्रियोद्देश्यतया स्थिते।
कान्तेन हरिणा साकं लक्ष्म्यस्तु तव मङ्गळम्॥ ९॥

स्वदृष्टिगोचरस्थानसिध्यत्संपत्समृद्धिके।
विलसत्सर्वकल्याणे लक्ष्म्यस्तु तव मङ्गळम्॥ १०॥

www.prapatti.com

दिव्यं स्थानं परित्यज्य पत्या सह नमस्कृते।
ओंकारनगरीं प्राप्ते लक्ष्म्यस्तु तव मङ्गळम्॥ ११ ॥

यः पठेत्सन्ततं लक्ष्मीमङ्गळम् भक्तिमान् नरः।
स स्यात्तस्याः प्रसादेन सर्वमङ्गळभाजनम्॥ १२ ॥

॥ इति श्री महालक्ष्मी मङ्गळं संपूर्णम्॥

www.prapatti.com